
ISSN 0975-4474

५४. १ चैत्र २०७४ वि. सं. मार्च, २०१७ ई.

# विश्व-संस्कृतम्

[ त्रैमासिकम् ]



महर्षिविश्वामित्रः

सम्पादकः
प्रो. इन्द्रदत्त उनियालः

सह-सम्पादक :
डॉ. देवराजशर्मा

## विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्

साधु-आश्रमः, होश्यारपुरम्-१४६ ०२१ (पंजाब)

एक प्रति का मूल्य - १७ रु.

Scanned with CamScanner

# पुरुषतत्त्वराद्धान्तस्य दार्शनिकी चिन्तनपरम्परा
# ( श्रीमद्भगवद्गीतापरिप्रेक्ष्ये )

डॉ. ललितपटेलः
असिस्टन्ट प्रोफेसर,
श्रीसोमनाथसंस्कृतयूनिवर्सिटी,
सञ्चालित-संस्कृतकालेज, वेरावलम् (गुजरात)

**पुरुष-शब्दार्थः**

'पुरुष' इति शब्दस्य व्युत्पत्तिं प्रतिपाद्येत चेत् 'पुरि ओषति प्रकाशयतीति पुरुषः' तथा 'पुरि शेते तस्मात्पुरुषः' इति शतपथब्राह्मणम्। अथ यस्मात् पुरुषमेधो नामेमे वै लोकाः पूरयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुषः। तस्य यदेष लोकेष्वन्नं तदस्यान्नं मेधस्तदस्यैतदन्नं मेधस्तस्मात्पुरुषमेधः[१]। उपर्युक्त-निर्वचनानुसारमिदं संपूर्णं जगत्पुरम्। जगति प्रागेव विद्यमानोऽयं विराट्पुरुषः अत एव पुरुषः उच्यते। पुरि (लोके) शेते इत्यस्य तात्पर्यं वर्तते निर्लिप्तभावेन विद्यमानः स्थितो वा[२]। उक्तञ्च श्वेताश्वतरोपनिषदि यत्-**सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति**[३]।। शाङ्करभाष्येऽपि प्रतिपादितं-'लोके प्राणिनिकाये सर्वमावृत्य संव्याप्य तिष्ठति' इति। श्रीसांख्यप्रवचनेऽपि श्रीकपिलभगवान्नपि पुरुषस्वरूपविषये उवाच यत्-'न कालयोगतो व्यापिनो नित्यस्य सर्वसम्बन्धात्'[४]। अत एव पुरुषो व्यापकः नित्यश्च सर्वकालसम्बन्धोपाधित्वात् अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः-'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः' इति

---

१. शतपतब्राह्मणम्-१३.६.२.१. २. ऋ, -१०/९०/२८.
३. श्वेताश्वतरोपनिषद्,शाङ्करभाष्यम्-पृ.२९७. ४. श्रीसांख्यप्रवचनम्, सूत्रम्-१२.



Scanned with CamScanner

कठोपनिषद्[५]। सांख्यदर्शनमनुसृत्य संघातपरार्थत्वात्, त्रिगुणादिविपर्ययात्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेः च पुरुषोऽस्ति इति सिद्धम्। तत्र प्रतिशरीरभिन्नक्रियत्वात् अयुगपतप्रवृत्तेश्च पुरुषबहुत्वमपि स्पष्टीकृतम्[६]।

**पुरुषतत्त्वराद्धान्तस्य दार्शनिकी चिन्तनपरम्परा-**

पुरुषतत्त्वमपि द्विधा विभज्यते लौकिकमलौकिकं च। दार्शनिकचिन्तनपरम्परायां यस्य पुरुषतत्त्वस्य चिन्तनं दृश्यते तद् अलौकिकम्। एषा चिन्तनपरम्परा वेदात् उररीक्रियते। यज्ञपुरुषादेव ऋगादीनां चतुर्णामपि वेदानामाविर्भावः अभवत्[७]। तत्र-ऋग्वेदः सर्वेभ्यः प्राचीनतम इति सर्वैरेव अङ्गीक्रियते। तस्य दशममण्डलस्य सूक्तं 'पुरुषसूक्तम्', तत्र प्रथमवारं पुरुषस्वरूपविषये सविस्तरम् आध्यात्मिककल्पनया भव्यं निदर्शनं विधाय पुरुषतत्त्वविचारः कृतो वर्तते। अयं पुरुष एव वर्तमानं भूतं भव्यञ्च जगत् इति[८]। यजुर्वेदस्य एकत्रिंशत्तमे अध्यायेऽपि पुरुषतत्त्वविचारो वर्तते। एवञ्च श्वेताश्वतरोपनिषदः तृतीयेऽध्यायेऽपि इदं पुरुषतत्त्वनिरूपणमवलोक्यतेऽस्माभिः। श्रीमद्भगवद्गीतायाः त्रयोदशतमेऽध्याये संक्षेपेण भगवता कृष्णेन पुरुषतत्त्वराद्धान्तः पार्थाय प्रतिबोधितः। सांख्यदर्शनस्य तु प्रकृतिः पुरुषः इति द्वे तत्त्वे एव मूलतः स्वीक्रियेते।

**पुरुषसूक्ते पुरुषतत्त्वराद्धान्तः-**

पुरुषसूक्ते वर्णितः पुरुषः आत्मस्वरूपः सर्वेषु जीवेषु चतुर्दशभुवनमण्डले विद्यमानेषु सूत्रात्मरूपेणावस्थितः सर्वेषां जीवानां यान्यनन्तानि शिरांसि नेत्राणि सन्ति तानि सर्वाणि तस्यैवात्मस्वरूपस्य। स एव विराट्पुरुषः सम्पूर्णं ब्रह्माण्डं स्वमहिम्ना परिवेष्ट्यातिरिक्ते

---

५. कठोपनिषद्-१.३.११.　　६. सांख्यकारिका-ईश्वरकृष्णः

७. उपनिषद्-भाष्यम्-तत्र श्वेताश्वतरोपनिषद्-३/१६.

८. वैदिकसूक्तसंग्रहः-डॉ. देवेन्द्रनाथः पाण्डेयः-पृ.४८८.

Scanned with CamScanner

दशाङ्गुलपरिमिते क्षेत्रे हृदये वा सर्वेषां जीवानामतिक्रम्यावस्थितो वर्तते[९]। सर्वेषां जीवानां निरीक्षणं कुर्वन् सः सर्वेभ्यो कर्मफलप्रदानमपि करोतीति वर्णितो विद्यते।

अस्य विराट्पुरुषस्य चतुर्थांशः भागः मायया उपहितो भूत्वा संसारबन्धने आपतति। त्रिपात्पुरुषः अस्मात् संसाराद् उत्कृष्टस्थले तिष्ठति। सः संसाररहितः ब्रह्मस्वरूपः ऊर्ध्व उदैत्। तस्यास्य सोऽयं पादो लेशः सोऽयम् इह मायायां पुनः अभवत्। सृष्टिसंहाराभ्यां पुनः पुनरागच्छति। अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताऽप्युक्तम्-'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति[१०]। ततो मायायामागत्यानन्तरं चतुर्थांशः भागः विष्वङ्देव-मनुष्यतिर्यगादिरूपेण व्याप्तवान्[११]।

सृष्ट्योत्पत्त्यर्थं देवाः साध्याः ऋषयश्च पुरुषेण हविषा यज्ञमकुर्वन्। तत्र विशेषहविरूपेण यज्ञीयद्रव्यरूपेण च वसन्तमाज्यरूपेण, इध्मरूपेण ग्रीष्मं, शरदञ्च विशेषहविरूपेण कल्पयामासुः[१२]। अस्मिन् मानसे यज्ञे सत्त्व-रज-तमोगुणाः हि प्राधान्यं लभन्ते। त एव आज्य-इध्म-हविरूपेणात्र परिकल्पिताः। तस्मात् मानसिकात् वैदिकधर्मरूपयज्ञात् पृषदाज्यमुत्पन्नं, ततश्च पृषदाज्यात् क्रमेण पक्षिणः ग्राम्यारण्यपशवश्च चक्रे[१३]। तस्य विराट्पुरुषस्य मुखस्थानीयः ब्राह्मणः, बाहूस्थानीयः क्षत्रियः, उरूस्थानीयः वैश्यः, पादौस्थानीयश्च शूद्रोऽभूत्[१४]। तस्य पुरुषस्य मनसः चन्द्रमा, चक्षोः सूर्यः, मुखात् इन्द्राग्नी, प्राणात् वायुश्च अजायत[१५]। देवानां निवासाय विराट्पुरुषस्य नाभिप्रदेशात्

---

९. ऋग्वेदः, १०/९०/१.
१०. श्रीमद्भगवद्गीता, १०.४२.
११. ऋग्वेदः, १०/९०/४.
१२. ऋग्वेदः, १०/९०/६-७.
१३. तत्रैव, १०/९०/८.
१४. तत्रैव, १०/९०/१२.
१५. तत्रैव, १०/९०/१३.

Scanned with CamScanner

अन्तरिक्षलोकः, शिरसः द्युलोकः, पद्भ्यां भूमिः, श्रोत्राद् दिशः पूर्वादयश्च उत्पन्नाः[१६]। तस्मात् यज्ञात् एव ऋचः, सामानि, छन्दांसि, यजुश्च अजायत[१७]।

**श्वेताश्वतरोपनिषदि पुरुषः –**

श्वेताश्वतरोपनिषदः तृतीयोऽध्यायेऽपि पुरुषतत्त्वं वर्णितमस्ति। तेन पुरुषेण सर्वं व्याप्तं वर्तते[१८]। शङ्कराचार्येणापि तत्र उक्तं– ''यस्मान्नाणीयोऽणुत्तरं न ज्यायो महत्तरं वास्ति'' इति[१९]। हिरण्यगर्भा स उत्तरोत्तरं सर्वव्यापकश्च[२०]। सः पुरुषः महान्प्रभुः, समर्थः, जगदुदयस्थितिसंहारे सत्त्वस्य प्रवर्तकः[२१]। अङ्गुष्ठमात्रः अन्तरात्मापुरुषः जनानां हृदये संनिविष्टः। मन्वीशः–ज्ञानेशः हृदा मनसा च ये तं पुरुषं विदुः अमृतास्ते भवन्ति[२२]। सः एव सर्वस्य प्रभुः ईशानः आश्रयश्च[२३]। सर्वस्य स्थावरस्य चरस्य च वशी (स्वामी) पुरुषोऽयं हंसः नवद्वारे (शिरसि सप्तद्वाराणि देवे अवाची) पुरे (शरीरे) देही भूत्वा कार्यकरणोपाधिः हन्त्यविद्यात्मकं कार्यमिति, लेलायते बहिर्विषयग्रहणाय[२४]। स आदिपुरुषः अणोरणीयान् महतो महीयान्। अयमात्मा जन्तोः गुहायां (हृदये) स्थितः। परमेश्वरस्य प्रसादात् यः साधकः तमक्रतुम् ईशं महिमानं च पश्यति सः वीतशोको भवति[२५]। ब्रह्मवादिनः प्रवदन्ति यत् नास्ति तस्य पुरुषस्य जन्म। सः नित्यो भवति[२६]।

**भगवद्गीतायां पुरुषतत्त्वराद्धान्तः।**

भगवद्गीतायाः त्रयोदशतमेऽध्याये प्रथमे श्लोके एव अर्जुनः

---

१६. ऋग्वेदः–१०/१०/१४.
१७. तत्रैव–१०/१०/९.
१८. श्वेताश्वतरोपनिषद्–३/९.
१९. शाङ्करभाष्यम्, पृ. २९४.
२०. श्वेताश्वतरोपनिषद्, ३, १०–११
२१. तत्रैव–३/१२.
२२. तत्रैव–३.१३.
२३. तत्रैव–३/१४–१५.
२४. तत्रैव–३/१८.
२५. तत्रैव–३/२०.
२६. तत्रैव–३/२१.

Scanned with CamScanner

प्रकृतिं पुरुषं, क्षेत्रं क्षेत्रज्ञं च ज्ञातुं भगवन्तं कृष्णं पृच्छति यत्- प्रकृतिं **पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च। एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव**[२७]। प्रकृतिः तथा पुरुषः, क्षेत्रं तथा क्षेत्रज्ञम्, ज्ञानं तथा ज्ञेयम् इति अत्रार्जुनः युग्मत्रयस्य विषये ज्ञातुम् ईहते। तत्र भगवता कृष्णेन उक्तं- हे अर्जुन! प्रकृतिं पुरुषं च उभावपि अनादी विद्धि एवञ्च रागद्वेषादिविकारान् तथा गुणान् अर्थात् त्रिगुणात्मकसम्पूर्णपदार्थानपि प्रकृतिसम्भवान् विद्धि[२८]। कार्यकरणकर्तृत्वे प्रकृतिः हेतुः (कारणम्) कथ्यते तथा सुखदुःखानां भोक्तृत्वे हेतुरुच्यते[२९]। अत्र कार्यम् अर्थात् शरीरम्। करणम् अर्थात् त्रयोदशेन्द्रियाणि। पुरुषः जीवः क्षेत्रज्ञः भोक्ता इति समानार्थकाः वाच्याः। सुखं दुखं च भोग्ये स्तः किन्तु भोक्तृत्वे पुरुषोऽयं कारणम्। अयमेव कार्यकारणसिद्धान्तः सांख्यस्य अनुपमः सिद्धान्तः जातः। किं कार्यम्, किं च कारणमिति विप्रतिपत्तौ सांख्याभिमतं यत् कार्यकारणयोर्न तात्त्विको भेदः। कार्यस्याव्यक्तावस्थैव कारणम्, कारणस्य च व्यक्तावस्थैव कार्यम् इति। तद्यथा-घटो मृद्रूपेण कारणम्, मृच्च घटरूपेण परिणतं कार्यम्। अभावाद् भावोत्पत्तिर्न जायते न च भावस्य विनाशः। एतदेव गीतायां प्रकारान्तरेण निर्दिश्यते- **नासतो विद्यते भावो नाभावो विद्यते सतः**[३०]। सांख्यानामेष एव राद्धान्तः सत्कार्यवादः परिणामवादः विकारवादः इत्यादिनामभिः व्यवह्रियते। स्वाभिमतसंपुष्टौ सांख्याचार्यैः युक्ति-पञ्चकं प्रस्तूयते- **असदकरणादुपादानग्रहणात् सर्वसम्भावभावात्। शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्**[३१]।

प्रकृतिस्थः अयं पुरुषः प्रकृतिजान् त्रिगुणात्मकपदार्थान्

२७. गीता-१३/१.
२८. तत्रैव १३/२०.
२९. तत्रैव १३/२१.
३०. तत्रैव-२/१६.
३१. सांख्यकारिका-२२

Scanned with CamScanner

भुङ्क्ते। एवञ्च गुणसङ्गः हि अस्य सदसद्योनिजन्मसु कारणम्[३२]। सत्वगुणसङ्गात् देवयोनौ, रजोगुणसङ्गात् मनुष्ययोनौ, तमोगुणसङ्गात् तिर्यग्-योनौ जन्म भवति। अस्मिन् देहे स्थितोऽपि अयं पुरुषः त्रिगुणातीतः परः परमात्मा एव। सः उपद्रष्टा (साक्षी), अनुमन्ता, भर्ता, भोक्ता, महेश्वरः चेत्युक्तः[३३]। यः मनुष्यः गुणैः सह पुरुषं प्रकृतिं च विजानाति सः कर्तव्यं कुर्वन्नपि भूयः नाभिजायते[३४]। अत्र क्षेत्रज्ञः एव पुरुषः इति ज्ञेयः तथा क्षेत्रं प्रकृतिः इति परिभाव्या।

**सांख्यदर्शने पुरुषतत्त्वराद्धान्तः-**

महर्षिकपिलप्रणीते सांख्यदर्शनेऽस्मिन् संक्षेपेण चतस्रः विद्याः संभाव्यन्ते। कश्चिदर्थः प्रकृतिरेव, कश्चिद्विकृतिप्रकृतिरेव, कश्चिदविकृतिरेव कश्चिदुभय इति। पुरुषः न प्रकृतिः, न विकृतिः[३५]। ईश्वरकृष्णानुसारं संघातपरार्थत्वात् त्रिगुणादिविपर्ययात्, अधिष्ठानात्, भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च पुरुषोऽस्ति इति सिद्धम्[३६]। सांख्यमतानुसारं चतुर्विंशतितत्त्वात्मकम् एतत् संघातं परार्थे एव भवति। सः परः असंघातरूपः पुरुषः। त्रिगुणमविवेकिविषयः सामान्यं अचेतनं प्रसवधर्मि। व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्।। इत्यत्र उक्तानि धर्माणि ज्ञेयानि त्रिगुणादिशब्देन। तथा हि पुरुषः अस्ति त्रैगुण्याधर्माणाम् त्रैगुण्यरहिततत्त्वार्थत्वात्। संसारेऽस्मिन् यद्यत् सुखदुःखमोहात्मकं तत्सर्वं परेणाधिष्ठीयमानं दृष्टम् रथादियन्त्रादिभिः। सुखदुःखमोहात्मकं चेत् बुद्ध्यादिः, तस्मादेतदपि परेण अधिष्ठातव्यम्। स च परस्त्रैगुण्यादन्यः पुरुषः। चतुर्विंशतितत्त्वानां भोक्ता तु पुरुष एव भोग्यत्वात्। सुखदुःखमोहात्मकत्वात् प्रकृत्यादिमहाभूतपर्यन्तं प्रपञ्चमेतत् भोग्यमेव। अत एतेषां भोगानां

---

३२. गीता-१३/२२.　　३३. तत्रैव, १३/२३.

३४. तत्रैव-१३/२४.　　३५. सांख्यकारिका।　　३६. सांख्यकारिका।

भोक्ता पुरुषः। दुःखत्रयस्य ऐकान्तिकमात्यन्तिकं निवृत्यर्थं दिव्यदृष्टयः ज्ञानिनः कान्तदर्शिनो वा मुनयः प्रयतमाना दृश्यन्ते। तत्र नित्यस्य चेतनस्य अस्य पुरुषस्य कैवल्यार्थे प्रवृत्तिः सत्वादेव जायते इति वृद्धजनप्रमाणाच्च पुरुषस्य सत्ता अवश्यमेव स्वीकरणीया।

पुनश्च संसारेऽस्मिन् सर्वत्र जनन-मरण-करणानां प्रतिनियमो दृश्यते। एकस्य जाते सति न हि सर्वे जायन्ते, न वा एकस्य मृते सति सर्वे म्रियन्ते। अतः प्रत्यक्षप्रमाणात्प्रतिशरीरभिन्नपुरुषत्वं सिद्धम्। अनेन पुरुषबहुत्वं सिद्धम्। पुनश्च त्रैगुण्यविपर्ययात् पुरुषस्य प्रतिशरीरभिन्नत्वं ग्राह्यम्[३७]। प्रकृतिपुरुषसंयोगेन हि सृष्टिक्रमः सञ्जायते। अतः प्रकृतिपुरुषयोः विवेकज्ञानादेव सुखदुःखमोहान् प्रकृतिदत्तान् भोगान् वा अनुभवन् जीवः बन्धनात् मुच्यते। पुरुषस्तु स्वभावादेव निर्लिप्तः तथापि बुद्धेः प्रतिबिम्बत्वात् बन्धनमनुभवति। प्रकृतिरपि नर्तकी इव पुरुषाय विविधान् भोगापवर्गान् उपस्थाप्य तस्मात् निवर्तते[३८]।

**भगवद्गीतायाः पुरुषतत्त्वराद्धान्तविशेषता-**

एवं पुरुषसूक्ते कृतः पुरुषतत्त्वराद्धान्तः श्वेताश्वतरोपनिषदि तथा सांख्यदर्शने प्रतिबिम्बितं दृश्यते। दार्शनिकोऽयं पुरुषराद्धान्तः क्रमेणोत्तरोत्तरं वृद्धिमवाप्नोति। सहस्रमिति पदम् आधारीकृत्य रूपान्तरेण सङ्केतेन च सांख्ये प्रमाणपूर्वकं पुरुषबहुत्वं प्रवृत्तिरिति मन्ये। पुरुषबहुत्वविचारबीजं पुरुषसूक्त एव इति सुस्पष्टम्। अणोरणीयान् महतो महीयान् इति श्वेताश्वतरोपनिषदि पुरुषतत्त्व-राद्धान्ते प्रदानम्। ततः प्रकृतिपुरुषसंयोगः तथा प्रत्यसर्गः, तस्मात् चतुर्विंशतितत्त्वप्रपञ्चस्तु भगवद्गीतायाः तथा सांख्यस्य परिकल्पना। आध्यात्मिक्या कल्पनया यः सृष्टिप्रपञ्चः पुरुषसूक्ते विराट्पुरुषात्

---

३७. सांख्यकारिका। ३८. सांख्यकारिका।

परिकल्पितः तदेव सङ्केतेन रूपान्तरेण च प्रकृतिपुरुषसंयोगेन भगवद्गीतायां सांख्ये च समासेन उररीकृतः।

◦ भगवद्गीतायाः कार्यकारणसिद्धान्तः एव सांख्यस्य सत्कार्यवादरूपेण अनुपमः सिद्धान्तः जातः।

◦ सांख्यप्रकृतिपुरुषसंयोगः प्रत्ययसर्गः संक्षेपेण भगवद्गीतायां निरूपितः त्रयोदशतमे अध्याये।

◦ देहे स्थितोऽपि त्रिगुणातीतः परः उपद्रष्टा, भर्ता, भोक्ता महेश्वरादिविशेषणानि सांख्येऽपि पुरुषतत्त्वविचारे प्रयुक्तानि।

◦ नर्तकी इव प्रकृतिरपि 'पुरुषाय निवर्तते' इति तस्य बीजं भगवद्गीतायां दृश्यते–तेऽपि अतितरन्ति मृत्युमपि (भगवद्गीता–१३.२४,२५)।

Scanned with CamScanner